तल्पनं, क्ली, (तल्प इवाचरति । तल्प+क्विप्+ल्युट् ।) करिपृष्ठम् । इति भूरिप्रयोगः ॥ पृष्ठवंशस्य मांसम् । इति हारावली ॥

तल्लं, क्ली, (तस्मिन् भूदेशे लीयते इति । ली+डः ।) बिलम् । इति त्रिकाण्डशेषः ॥

तल्लः, पुं, (तस्मिन् लीयते इति । ली+डः ।) जलाधारविशेषः । इति मेदिनी । ले, २२ ॥ तलाओ इति हिन्दीभाषा ॥

तल्लजः, पुं, (तत् प्रसिद्धं यथास्यात् तथा लजतीति । लज+अच् ।) प्रशस्तः । इत्यमरः ॥ अयं अजहल्लिङ्गः समासे उत्तरपदे भवति । यथा कुमारीतल्लजः । इत्यमरटीका ॥

तल्ली, स्त्री, (तत् प्रसिद्धं यथा तथा लसतीति । लस+डः स्त्रियां ङीष् च ।) तरुणी । इति मेदिनी । ले, २२ ॥

तवक्षीरं, क्ली, (तु+अच् । तवं क्षीरमिति नित्यकर्म्मधारयः ।) तीखाचौर इति ख्यातम् । तत्पर्य्यायः । पयःक्षीरम् २ यवजम् ३ यवजोद्भवम् ४ । अस्य गुणाः । मधुरत्वम् । शिशिरत्वम् । दाहपित्तक्षयकासकफश्वासास्रदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

तवक्षीरी, स्त्री, (तवक्षीर+ङीष् ।) गन्धपत्रा । इति राजनिर्घण्टः ॥

तवराजः, पुं, (तु+अच् तवः पूर्व्वः सन् राजते । राज+अच् ।) यवासशर्करा । इति राजनिर्घण्टः ॥ (यवासशर्कराशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

तवराजोद्भवखण्डः, पुं, (उद्भवत्यस्मादिति । उत्+भू+अच् । उद्भव उत्पत्तिस्थानम् । तवराज उद्भवोऽस्य । यद्वा, तवराजात् उद्भवतीति । उद्+भू+अच् ।) ततः कर्म्मधारयः । यवासशर्कराभवखण्डः । तत्पर्य्यायः । सुधामोदकजः २ खण्डजोद्भवजः ३ सिद्धमोदकः ४ अम्बुतसारजः ५ सिद्धखण्डः ६ । अस्य गुणाः । दाहतापतृष्णामोहमूर्च्छाश्वासनाशित्वम् । इन्द्रियतर्पणत्वम् । शीतत्वम् । सदासुमधुरत्वञ्च । इति राजनिर्घण्टः ॥

तविषः, पुं, (तव+"तवेर्णिद्वा ।" उणां । १ । ४८ । इति टिषच् ।) स्वर्गः । समुद्रः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

तविषी, स्त्री, (तविष+संज्ञायां ङीष् ।) नदी । देवकन्या । भूमिः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (बलम् । यथा, ऋग्वेदे । १ । ३५ । ४ ।
"कृष्णा रजांसि तविषीं दधानः ॥")

तष्टः, त्रि, (तक्ष+क्तः । पृषोदरात् कलोपे साधुः ।) तनूकृतः । इत्यमरः । ३ । १ । ९९ ।

तष्टा, [ऋ] पुं, (तक्ष कार्ष्ण्ये+तृच् पृषोदरात् कलोपे साधुः ।) त्वष्टा । छुतार इति भाषा । विश्वकर्म्मा । आदित्यविशेषः । इत्यमरटीकायां रमानाथः ॥

तस, इ कि अलङ्कृतौ । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट् ।) इ, कर्म्मणि तंस्यते । कि, तंसयति तंसति हारी जनम् । इति दुर्गादासः ॥

तस, य उ इर उत्क्षेपे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदित्वात् क्त्वावेट् ।) य, तस्यति धूलिं वायुः । उ, तसित्वा तस्त्वा । इर, अतसत् । अतासीत् । अतसीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

तसरः, पुं, (तनोतीति । तन+"तन्वृषिभ्यां क्सरन् ।" उणां ३ । ७५ । इति सरन् किञ्च ।) त्रसरः । सूत्रवेष्टनम् । इत्युणादिकोषः ॥ (यथा, वाजसनेयसंहितायाम् । १९ । ८३ ।
"रसं परिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम ॥")

तस्करः, पुं, (तत् करोतीति । कृ+"दिवाविभेति ।" ३ । २ । २१ । इत्यस्य सूत्रस्य "किं यत्तद्बहुषु कृञोऽज्विधानम् ।" इति वार्त्तिकोक्तेरच् । ततः । "तद्बृहतोः करपत्योः इति सुट्तलोपौ ।) चौरः । एकागारिकः । इति रत्नमाला ॥ मदनवृक्षः । इति जटाधरः ॥ कर्णः । यथा, रघुः । १ । २७ ।
"व्यावृत्ता यत् परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥"
"तस्करः कर्णचौरयोरिति कोषान्तरम् ।" इति तट्टीका ॥

तस्करस्नायुः, पुं, (तस्करस्य एकागारिकस्य स्नायुरिव ।) काकनासालता । इति राजनिर्घण्टः ॥

तस्करी, स्त्री, (तद्+कृ+चौरार्थे टः टित्वात् ङीप् । सुटि तलोपे च साधुः ।) कोपना नारी । इति शब्दार्थकल्पतरुः ॥

ताटङ्कः, पुं, (ताड़ङ्क+पृषोदरात् साधुः ।) ताड़ङ्कः । इति द्विरूपकोषटीकायां भरतः ॥ (यथा, देवीभागवते । १२ । ६ । ७१ ।
"तलोदरी तिरोभावा ताटङ्कप्रियवादिनी ॥")

ताटस्थ्यं, क्ली, (तटस्थ+भावे ष्यञ् ।) उदासीनत्वम् । निकटस्थत्वम् । यथा, ताटस्थ्येन उदासीनत्वेन इति । तटस्थो निकटस्थः प्रसिद्धपूर्व्वप्रणय इति च काव्यप्रकाशटीकायां चण्डिदासः ॥

ताड़ः, पुं, (तड़+भावे घञ् ।) ताड़नम् । शब्दः । मुष्टिमेयतृणादि । इति मेदिनी । ड़े, १४ ॥ पर्व्वतः । इति हेमचन्द्रः ॥

ताड़का, स्त्री, राक्षसीविशेषः । सा सुकेतुयक्षकन्या ब्रह्मवरेण सहस्रहस्तिबलयुता धुन्धुदैत्यपुत्त्रस्य सुन्दस्य भार्य्या मारीचमाता सुन्दे निहते पुत्त्रेण सह अगस्त्यमृषिं धर्षयितुमुद्यता तस्य शापात् सपुत्त्रा राक्षसत्वं गता श्रीरामेण निहता । इति रामायणम् ॥

ताड़काफलं, क्ली, (तारकेव नक्षत्रमिव फलमस्य । रस्य ड़त्वम् ।) वृहदेला । इति रत्नमाला ॥

ताड़ङ्कः, पुं, (तालं तालपत्रमिव अङ्क्यते लक्ष्यते इति । अङ्क+घञ् । लस्य ड़त्वम् । शकन्ध्वादित्वात् साधुः ।) कर्णभूषा । कानतड़का इति भाषा ॥ तत्पर्य्यायः । कर्णदर्पणः २ । इति त्रिकाण्डशेषः ॥ ताटङ्कः ३ । इति द्विरूपकोषटीकायां भरतः ॥ कर्णिका ४ तालपत्रम् ५ । इत्यमरः ॥ ताड़पत्रम् ६ । इति हेमचन्द्रः । ३ । ३२० ॥ कर्णसुन्दरः ७ । इति जटाधरः ॥ (यथा, मनसाध्याने ।
"ताड़ङ्काङ्गदमेखलागुणरणन्मञ्जीरतां प्रापितां कैरातीं वरदाभयोद्यतकरां देवीं त्रिनेत्रां भजे ॥")

ताड़नं, क्ली, (ताड़ि+भावे ल्युट् ।) आघातः । यथा, शृङ्गारतिलके ।
"श्लाघ्यं नीरसकाष्ठताड़नशतं श्लाघ्यः प्रचण्डातपः ॥"
यथाच, गारुड़े ९६ अध्याये ।
"श्रुतिस्मृत्युक्तमाचारं कुर्य्यात्कर्म्माणि न स्पृशेत् ।
न निन्दाताड़ने कुर्य्यात् सुतं शिष्यञ्च ताड़येत् ।
आचरेत् सर्व्वदा धर्म्मं तद्विरुद्धन्तु नाचरेत् ॥"
अपि च चाणक्ये । १२ ।
"लालने बहवो दोषास्ताड़ने बहवो गुणाः ।
तस्मात् पुत्त्रञ्च शिष्यञ्च ताड़येन्न तु लालयेत् ॥"

ताड़नी, स्त्री, (ताड्यतेऽनयेति । ताड़ि+करणे ल्युट् स्त्रियां ङीप् ।) अश्वताड़नयष्टिः । तत्पर्य्यायः । चर्म्मयष्टिः २ कशा ३ भीमा ४ चर्म्मनालिका ५ । इति शब्दमाला ॥

ताड़पत्रं, क्ली, (तालस्य पत्त्रमिव । लस्य ड़त्वम् ।) ताड़ङ्कः । इति हेमचन्द्रः । ३ । ३२० ॥

ताड़िः, स्त्री, (ताड़यति पत्रैः शोभते इति । तड़ शोभे+णिच्+इन् ।) वृक्षविशेषः । इत्यमरटीकायां भरतः ॥ ताड़ियात् इति भाषा ॥

ताड़ी, स्त्री, (ताड़िः कृदिकारादिति वा ङीष् ।) पत्रद्रुमः । इत्यमरमेदिनीकरौ ॥ तत्पर्य्यायः । ताड़िः २ ताली ३ तालिः ४ । इति भरतः ॥ ताड़ियात् इति भाषा ॥ (यथा, राजतरङ्गिण्याम् । ३ । ३२८ ।
"शुष्कतमालपत्राणि शीर्णताड़ीदलानि च ।
तत्सेनार्णवतीराणि चक्रेऽरिस्त्रीमुखानि च ॥")
आभरणविशेषः । इति दुर्गसिंहः ॥

ताड़ुलः, पुं, (ताड़यतीति । तड़+णिच्+उल ।) ताड़यिता । इति संक्षिप्तसारे उणादिवृत्तिः ॥

ताड्यमानः, पुं, (ताड्यते असौ । ताड़ि+कर्म्मणि शानच् ।) पटहादिः । इति त्रिकाण्डशेषः ॥ ताड़नयुक्ते, त्रि । (यथा, कुमारे । १ । ४५ ।
"अप्यन्यपुष्टा प्रतिकूलशब्दा
श्रोतुर्वितन्त्रीरिव ताड्यमाना ॥")

ताण्डवं, क्ली, पुं, नृत्यम् । इत्यमरः । १ । ७ । १० ॥ ताण्डेन मुनिना कृतं ताण्डि नृत्यशास्त्रं तदस्त्यस्येति । इति भरतः ॥ तण्डुना प्रोक्तमिति स्वामी ॥ ("पुंस्त्वं ताण्डवं प्राहुः क्लीवत्वं लास्यमुच्यते ॥" इति शब्दार्थचिन्तामणिधृतवचनेन पुंस्त्वम् ॥) तृणविशेषः । उद्धतनृत्यम् । इति मेदिनी । वे, ३६ ॥ (यथा, मत्स्यपुराणे । १ । १ ।
"प्रचण्डताण्डवाटोपे प्रक्षिप्ता येन दिग्गजाः ।
भवन्तु विघ्नभङ्गाय भवस्य चरणाम्बुजाः ॥")